# <u>रुक्मिणीहरणम् व्याख्या</u>

**जनार्दनप्रियमहिला न निर्दया**
**जनान् वहुन् समुपगता न चासती।**
**सरस्वतीप्रतिवनिता न वाग्मिनी**
**चिरन्तनी न परिचिता च साऽभवत्॥**

अयं श्लोकः ऊनविंशशताव्दीकालीनेन वङ्गजातेन कविवरेण महामहोपाध्यायहरिदाससिद्धान्तवागीशमहोदयेन विरचितस्य "रुक्मिणीहरणम्" नामधेयस्य महाकाव्यस्य प्राथमिकः मङ्गलविधानात्मकः।

अनेन श्लोकेन भीष्मककन्यायाः रुक्मिण्याः लक्ष्मीरूपायाः माहात्म्यजातं वर्णयन्नाह कविवरः "जनार्दनः....." इत्यादि।

सा लक्षीरूपा भीष्मककन्या जनार्दनप्रियमहिला जनार्दनप्रिया तथा नारायणप्रिया महिला देवी भूत्वा अपि निर्दया निष्करुणा न अभवत् आसीत्। [ तथा पुनः] वहून् वहुविधान् जनान् नरान् समुपगता धनसम्पद्भिः प्राप्ता अपि असती व्यभिचारिणी न (अभवत्) आसीत्। सरस्वतीप्रतिवनिता वागदेव्याः सपत्नी भूत्वापि सा वाग्मिनी वाक्पटुः न (अभवत्)। [तथा पुनः] चिरन्तनी पुरातनी सत्यपि (लोकेषु) (स्वरूपेण) [लक्षीरूपेण] सा कन्या परिचिता अवगता च न अभवत् आसीत् इत्यन्वयः।

सद्यजातयोः भीष्मककन्यायाः रुक्मिण्याः वैशिष्ठ्यजातं रूपं सौन्दर्यजातं द्दष्ट्वा जनाः तां साक्षात् लक्ष्मीरूपाम् अमन्यत। जनार्दनस्य प्रियतमा भूत्वापि सा सामान्यजनेषु न निर्दया आसीत्। वहुजनेषु गमनकारणसत्त्वेऽपि तस्य अस्ती इति अभिधापि नासीत्। सरस्वत्याः सपत्नी भूत्वापि सा वाग्मिनी नाभवत्। पुरानभूत्वापि सा स्वरूपेण परिचिता नाभवत् नूतनरूपेण जन्मग्रहणात् इति भावः।

अत्र छेकवृत्त्यनुप्रासौ विशेषोक्तिश्च अलङ्कारः रुचिरा वृत्तम् चेति।

**शिवः शिवापदतलगः शवोऽपि सन्**
**भवन्महाम्वरमपि यो निरम्वरः।**
**रमार्द्धभाक् तनुरपि मारमारकः**
**स वो भवो भवतु विभुर्विभूतिदः॥**

अयं श्लोकः ऊनविंशशताव्दीकालीनेन वङ्गजातेन कविवरेण महामहोपाध्यायहरिदाससिद्धान्तवागीशमहोदयेन विरचितस्य "रुक्मिणीहरणम्" नामधेयस्य महाकाव्यस्य प्राथमिकः मङ्गलविधानात्मकः।

अनेन श्लोकेन देवादिदेवस्य शिवस्य माहात्म्यख्यापनेन आशिर्वादः प्रार्थ्यते "शिवः....." इत्यादि।

यः शिवः (महादेवः) शिवापदतलगः कालिचरणतलप्राप्तः शरः सन्नपि निष्प्राणदेहः सन् भूत्वा अपि शिवः मङ्गलमयः (तिष्ठति)। [ तथा पुनः] (यः) [महदेवः] महाम्वरम् अखण्डाकाशः भवन् सन् अपि निरम्वरः दिगम्वरः [आकाशभिन्न इति यावत्] (तिष्ठति)। (यः) [महादेवः] रमार्द्धभाक्तनु अर्धनारीश्वरदेहः (मिलितपार्वतीशरीरः) [सन्] भवन् अपि मारमारकः कामहन्ता (तिष्ठति)। स पूर्वोक्तः तादृशगुणविशिष्टः विभुः सर्वव्यापकः भवः महादेवः वः युक्माकं (काव्यपाठकानाम्) विभूतिदः सम्पत्प्रदाता भवतु स्याद् इत्यन्वयः।

"आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्यलङ्कारिकोक्तवचनात् देवतानामोच्चारणेन गणादिशुद्धिकरणेन महादेवस्य माहात्मख्यापनेन आशीर्वादप्रार्थनं कुर्वता कविवरेण शिवस्य कालिचरणतलत्वे अपि मङ्गलजनकत्वं अखण्डाकाशमूर्त्तित्वे अपि

दिगम्वरत्वं कामहन्तारकत्वेऽपि भक्तिवाञ्छा-चरितार्थत्वं विभूत्वं तथा सम्पद्/ धनसम्पदादि दातृत्वं ख्यापितम्। अनेन शिवस्य एतादृशवहुविधमाहात्म्यकथनेन तस्य गुणवर्णनमुखेन तस्मै शिवाय प्रणामाञ्जलिदानम् तेन च ग्रन्थस्य विघ्नशान्तिकल्पनं च कृतम्।

अत्र छेकवृत्त्यनुप्रासे शब्दालङ्कारौ, विरोधाभासश्चेति अर्थालङ्कारः। रुचिरा च वृत्तम्।